# संस्कृतवार्ता:

दिनाङ्क : - 11/08/2025 सायम् : - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदिल्ल्याः संसदसदस्यानां कृते नवनिर्मितानां चतुरशीत्यधिकैकशतसंख्याकानां आवासानाम् उद्घाटनं कृतं उक्तं च यत् एकभारतं श्रेष्ठ भारतमिति भावनायाः प्रतीकम् अस्ति।
- संसदा गोवाराज्यस्य विधानसभाक्षेत्रेषु अनुसूचितजनजातीनां प्रतिनिधित्वस्य पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य पुनर्समायोजनविधेयकं राज्यसभायाम् अद्य अनुमोदनानन्तरं पारितम्।
- संसदा पञ्चविंशति-षड्विंशत्यधिक द्विसहस्रतम वर्षस्य मणिपुरवस्तुसेवाकरसंशोधन विधेयकाय, पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य मणिपुरविनियोगविधेयकाय द्वितीयाय च स्वस्वीकृतिः प्रदत्ता।
- पाकिस्तानस्य सेनाप्रमुखस्य असीम मुनीरेत्यस्य सम्भाव्यपरमाणु समाह्वान विषये कृताया: टिप्पण्याः भारतेन निन्दिता।
- भारत ऋतुविभागेन अद्य हिमाचल-प्रदेशे, उपहिमालयीय-पश्चिमबङ्गे, सिक्किमे, उत्तराखण्डे च अतिवृष्टे: सञ्चेतना प्रसारितास्ति।

----------------------------------------

<u>पीएम संसद आवास</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदिल्ल्याः बाबा खड़कसिंहमार्गे संसदसदस्यानां कृते नवनिर्मितानां चतुरशीत्यधिकैकशतसंख्याकानां टाइप-7 इत्येवं प्रकाराकाणाम् आवासानाम् उद्घाटनं कृतम्। अस्मिन् अवसरे श्रीमोदी अवदत् यत्, एकविंशतिशताब्द्या: भारतं विकासाय उत्सुकं स्वस्य कर्तव्यानां प्रति संवेदनशीलम् च अस्ति। असौ अवदत् यत्, चतुर्दशोत्तर द्विसहस्र तः अधुना यावत् प्रायः सार्द्ध त्रिशतं यावत् नवीनसांसदगृहाणि विनिर्मितानि जातानि। सः अवदत्

यत् सांसदनिवासस्थानानां अभावेऽपि चतुरोत्तर द्विसहस्रतः चतुर्दशोत्तर द्विसहस्र पर्यन्तं लोकसभा-सांसदानां कृते एक: नूतन: आवास: न निर्मित:।

श्रीमोदी अवदत् यत्, एतेषु गृहेषु विभिन्नराज्यानां सांसदाः एकत्रैव निवसन्ति यत् एकभारतं श्रेष्ठ भारतमिति भावनायाः प्रतीकम् अस्ति। प्रधानमन्त्रिणा उक्तं यत्, चतुर्णां गोपुराणां नामकरणं देशस्य कृष्ण, गोदावरी, कोसी, हुगली च महानदीषु नामकरणं कृतम् अस्ति।

आवासीयसङ्कुलानां निर्माणं संसदसदस्यानां कार्यानुकूल-आवश्यकतानां पूर्तये आधुनिकसौविध्येन च सुसज्जितम् अस्ति।

-----------------------------------------

<u>संसद-गोवा विधेयकः</u>

संसदा गोवाराज्यस्य विधानसभाक्षेत्रेषु अनुसूचितजनजातीनां प्रतिनिधित्वस्य पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य पुनर्समायोजनविधेयकं राज्यसभायाम् अद्य अनुमोदनानन्तरं पारितम्। गतसप्ताहे लोकसभायाम् एतत् विधेयकं पारितम् आसीत्। अनुसूचितजनजातीनां सदस्यानां प्रभाविन: लोकतान्त्रिकसहभागितायाः कृते आसनानां आरक्षणं तथा च गोवाराज्यस्य विधानसभायां पुनर्समायोजनस्य व्यवस्थां कर्तुं विधेयकस्य अस्य उद्देश्यम् अस्ति।

-----------------------------------------

<u>आरएस-मणिपुर विधेयकः-</u>

संसदा पञ्चविंशति-षड्विंशत्यधिक द्विसहस्रतम वर्षस्य मणिपुरवस्तुसेवाकरसंशोधन-विधेयकाय, पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य मणिपुरविनियोगविधेयकाय द्वितीयाय च स्वस्वीकृतिः प्रदत्ता। राज्यसभया अद्य चर्चायाः अनन्तरं एतानि विधेयकानि लोकसभायां प्रत्यावर्तितानि। राज्यसभायां एतेषां विधेयकानाम् विषये संक्षिप्तचर्चायाः उत्तरे केन्द्रीयवित्तमन्त्री निर्मलासीतारमण इत्येषा अवदत् यत्, मणिपुरराज्यस्य कृते आयव्ययकं महत्त्वपूर्णम् अस्ति तथा च अस्य प्रपत्रस्य पारणं सर्वेषां संवैधानिक-दायित्वम् अस्ति।

-----------------------------------------

## विदेशमन्त्रालय-पाकः-

विदेशमन्त्रालयस्य प्रवक्ता रणधीरजयसवालः एकस्मिन् वक्तव्ये उक्तवान् यत् पाकिस्तानस्य सेनाप्रमुखस्य असीम मुनीरेत्यस्य सम्भाव्यपरमाणु समाह्वान विषये कृतायाः टिप्पण्याः भारतेन निन्दा कृता।

---------------------------------------

## भाजपा-विरोधः

भाजपेति दलेन कांग्रेस दलोपरी आरोपितं यत् सः देशस्य निर्वाचनप्रक्रियायाः विरुद्धं मिथ्याप्रसारं करोति। अद्य नवदिल्ल्यां वार्ताहरसम्मेलनं सम्बोधयन् केन्द्रीयशिक्षामन्त्री तथा भाजपेति दलस्य वरिष्ठनेता धर्मेन्द्रप्रधानः अवदत् यत् काङ्ग्रेसः कदाचित् ईवीएम-मध्ये पारदर्शितायाः विषये प्रश्नं करोति, कदाचित् हरियाणा-महाराष्ट्रयोः निर्वाचनसम्बद्धान् विषयान् उत्थापयति। विशेषसघनपुनरीक्षणस्य विषये वदन् श्रीप्रधानः अवदत् यत् मतदातृसूचीं अद्यतनीकर्तुं निर्वाचनआयोगस्य नियमितप्रयोगः अस्ति।

इदानीं बिहारे मतदातृ सूच्याः विशेषसघनपुनरीक्षणस्य विरुद्धं विपक्षीय सांसदाः अद्य संसदभवनसङ्कुलात् निर्वाचनआयोगस्य कार्यालयपर्यन्तं विरोध प्रदर्शन यात्रां कृतवन्तः। विरोध प्रदर्शने काङ्ग्रेस दलाध्यक्षः मल्लिकार्जुन खर्गे तथा दलस्य नेता राहुलगांधी, राकांपा प्रमुखः शरदपवारः, सपा प्रमुखः अखिलेशयादवः, झामुमो नेता महुआ माजी, टीएमसी सांसदः डेरेक ओब्रायन इत्यादयः भागं गृहीतवन्तः। विधिव्यवस्थां निर्वहणाय दिल्ल्यारक्षि बलेन केचन सदस्याः निगडिताः।

---------------------------------------

## आस्ट्रेलियादेशस्य प्रधानमन्त्री :

आस्ट्रेलियादेशस्य प्रधानमन्त्रिणा एन्थोनी अल्बानीस् इत्यनेन घोषितं यत् सितम्बरमासे संयुक्तराष्ट्रसङ्घस्य महासभायाः अशीतितमे सत्रे आस्ट्रेलियादेशः फिलिस्तीन-राज्यं औपचारिकरूपेण मान्यतां प्रदास्यति, येन राष्ट्रस्य विदेशनीतौ महत्त्वपूर्णम् परिवर्तनम् अभवत्।

एषः निर्णयः आस्ट्रेलिया-देशं फ्रान्स्, ब्रिटेन, कनाडा इत्यादि देशानां श्रेण्यां स्थापयति, ये फिलिस्तीन-राज्यस्य मान्यतां प्रदातुं स्वस्याभिप्रायं प्रकटितवन्तः।

-----------------------------------------

**<u>रिजिजू विरोध:</u>**

संसदीयकार्याणां मन्त्री किरेन रिजिजू आरोपितवान् यत् विपक्षीदलानां नेतार: निर्वाचनआयोग-सर्वोच्चन्यायालय-इत्येतयो: संवैधानिक संस्थयो: प्रतिबिम्बं कलंङ्कयितुं कार्यं कुर्वन्ति। नवदिल्ल्यां वार्ताहरान् सम्बोधयन् श्रीरिजिजू प्रोक्तवान् यत् यद्यपि निर्वाचनआयोगेन त्रिंशत् यावत् विपक्षीय-संसदानां कृते तस्य सम्मुखे समाह्वानानि स्थापनाय निर्वाचनायोगेन सह मिलितुं अनुमति: प्रदत्ता: परञ्च ते नागता:।

-----------------------------------------

**<u>ऋतुविभाग:</u>**

भारत ऋतुविभागेन अद्य हिमाचल-प्रदेशे, हिमालयीय-पश्चिमबङ्गे, सिक्किमे, उत्तराखण्डे च अतिवृष्टे: सञ्चेतना प्रसारितास्ति। ऋतुविभागेन अण्डमान-निकोबारद्वी समूहेषु, अरूणाचलप्रदेशे, असमराज्ये, मेघालये, बिहारराज्ये पूर्वमध्यप्रदेशे च अत्यधिवृष्टि: भविष्यति इति पूर्वानुमानं प्रकृटितम्। हरियाणा, चण्डीगढ, कर्णाटक, केरल, माहे, पञ्जाब, तमिलनाडु, पुद्दुचेरी, कराईकल, तेलङ्गाना, उत्तर प्रदेशेषु च एतादृशा: परिस्थितय: प्रचलिष्यन्ति इति अपेक्षास्ति। सहैव उत्तराखण्डे उत्तरकाशीमण्डलस्य धाराली-हर्षिल-ग्रामयो: प्राकृतिक आपदाया: एकसप्ताहस्य अनन्तरम् अपि अन्वेषण-सहायोद्धार कार्यक्रमा: प्रचलन्ति।

।। इति वार्ता ।।